International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(2): 142-146
© 2020 IJSR
www.anantaajournal.com
Received: 14-01-2020
Accepted: 18-02-2020

**डॉ. नवीनशर्मा**
सहायकाचार्यः(ज्योतिषम्)
महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयः
कैथलनगरम्, हरियाणा, भारत

**Corresponding Author:**
**डॉ. नवीनशर्मा**
सहायकाचार्यः(ज्योतिषम्)
महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयः
कैथलनगरम्, हरियाणा, भारत

# वास्तुशास्त्रीय-गृहविभागानां दिग्दर्शनम्

**डॉ. नवीनशर्मा**

परमवैज्ञानिकेन निर्वचनशास्त्रप्रवक्त्रा श्रीमद्यास्कमुनिना वास्तुशब्दस्य निर्वचनमित्थं प्रतिपादितम् – 'वास्तुर्वसतेर्निर्वासिकर्मणः।' वासयोग्यं यत्स्थानं तद्वास्त्विति । वासयोग्यस्थानस्य आवश्यकता सर्वेभ्यः प्राणिभ्यः भवत्येव। साम्प्रतं यद्वास्तुप्रयोजनं कल्पितं तन्मानवेभ्य एव । अतः यस्मिन् शास्त्रे भूमौ भवने च वासकर्तृभ्यः मानवेभ्यः सर्वविध-सौविध्यप्राप्तेः सिद्धान्त-नियम-विधि-प्रविधीनाञ्च प्रतिपादनं क्रियते तन्नाम वास्तुशास्त्रम् । वास्तुशास्त्रीय-सिद्धान्तानुरूपं यदा गृहनिर्माणं क्रियते तदा तस्मिन् गृहे पञ्चतत्वानां पूर्णरूपेण सन्तुलनं भवति, येन तद् गृहं तस्य वासिनश्च शारीरिक-मानसिक-बौद्धिक-पारिवारिक-आर्थिक-सामाजिकोन्नोतिश्च प्राप्नुवन्ति । अतो शोधपत्रेऽस्मिन् वास्तु ग्रन्थेषु गृहविभागानां विश्लेशणं क्रियते ।

## वास्तुशास्त्रीय-गृहविभागनिरूपणम्

बृहद्वास्तुमालायामपि[१] रामदैवज्ञमतानुगुणमेव षोडशगृहाणां वर्णनं समुपलभ्यते यथा-

पूर्वस्यां श्रीगृहं प्रोक्तमाग्नेय्यां स्यान्महानसम् ।।
शयनं दक्षिणस्यां च नैर्ऋत्यामायुधाश्रयम् ।
भोजनं पश्चिमायां च वायव्यां धनसञ्चयम् ।
उत्तरे द्रव्यसंस्थानमैशान्यां देवतागृहम् ।
इन्द्राग्न्योर्मथनं मध्ये यमाग्न्योर्घृतमन्दिरम् ।
यमराक्षसयोर्मध्ये पुरीषत्यागमन्दिरम् ।
राक्षसजलयोर्मध्ये विद्याभ्यासस्य मन्दिरम् ।
तोयेशानिलयोर्मध्ये रोदनस्य च मन्दिरम् ।
कामोपभागशमनं वायव्योत्तरयोर्गृहम् ।
कौबेरेशानयोर्मध्ये चिकित्सामन्दिरं सदा ।
पुरन्दरेशयोर्मध्ये सर्ववस्तुषु संग्रहम् ।
सदनं कारयेदेवं क्रमादुक्तानि षोडश ।[१]

**वसिष्ठस्यापि इदमेव मतं वर्तते, तत्राष्टगृहाणां वर्णनं प्राप्यते यथा-**

ऐन्द्रयां स्नानगृहं कार्यमाग्नेय्यां पचनालयः।
याम्यायां शयनं वेश्म नैऋत्यां शस्त्रमन्दिरम्।।
वारूण्यां भोजनगृहं वायव्यां धान्यमन्दिरम्।
उदीच्यां हाटकं सद्म ऐशान्यां देवमन्दिरम्।।
हाटकस्य सुवर्णस्येदं हाटकम्।[२]

**कश्यपस्यापि इदमेव मतं किन्त्वत्रोत्तरदिशायां कोषगृहस्य स्थाने भाण्डारगृहस्योल्लेखः प्राप्यते यथा –**

प्राच्यां दिशि स्नानगृहमाग्नेय्यां पचनालयः। शयनं याम्यदिग्भागे नैऋत्यां शस्त्रमन्दिरम्।।
प्रतीच्यां भोजगृहं वायुभागेऽन्नसङ्ग्रहम्।
भाण्डारसदनं सौम्ये त्वैशान्यां देवतालयम्।[३]

**नारदस्य मतानुसारमपि भाण्डारगृहमुत्तरे वायव्यां च पशुमन्दिरं भवेत् यथा -**

भाण्डागारं तूत्तरे स्याद्वायव्यां पशुमन्दिरम्।[४]

विश्वकर्मणः अनुसारं तूत्तरस्यां जलस्नानव्यवस्था पूर्वस्याञ्च कोषागारो भवेत्।

उत्तरस्यां जलस्नानं पूर्वस्यां श्रीगृहं तथा।[५]

एवं प्रकारेण अनेकानेकग्रन्थेषु दिक्परत्वेन गृहविभागस्य विवेचनं कृतमस्ति। अत एवाग्रे मया विद्वद्भिः अधिकतः ग्राह्यमतानुसारं षोडशगृहाणां दिक्परत्वेन सहेतुकं विश्लेषणं करिष्यते।

## दिशाधिपतिविचारः

दिशाधिपतीनां प्रभावः सर्वदैव समस्तभूपदार्थेषु प्राणिषु च समरूपेण भूयते, तथापि मनुष्यः विशेषरूपेण प्रभावितो भवति। पूर्व-आग्नेय-दक्षिणादिदिशानां पतयः क्रमशः सूर्य-शुक्र-भौम-राहु-शनि-चन्द्र-बुध-बृहस्पतिग्रहास्सन्ति यथोक्तम्–

भानुः शुक्रः क्षमापुत्रः सैंहिकेयः शनिः शशी ।
सौम्यस्त्रिदशमन्त्री च प्राच्यादिदिगधीश्वराः ।।[६]

एवमेव दिशानां क्रमशः इन्द्र-अग्नि-यम-नैर्ऋति-वरूण-वायु-कुबेर-ईशदेवताः सन्ति। यथोक्तं बृहत्संहितायां –

पुरुहुतानलयमनिर्ऋतिवरुण पवनेन्दुंशङ्करा देवाः।
विज्ञातव्याः क्रमशः प्राच्याद्यानां दिशां पतयः ।।

## दिशाधिपतिज्ञानचक्रम्

| दिशा | दिशाधपतिग्रहाः | दिशाधिपतिदेवताः |
|---|---|---|
| पूर्वः | सूर्यः | इन्द्रः |
| आग्नेयः | शुक्रः | अग्निः |
| दक्षिणः | भौमः | यमः |
| नैर्ऋत्यः | राहुः | नैर्ऋतिः |
| पश्चिमः | शनिः | वरूणः |
| वायव्यः | चन्द्रः | वायुः |
| उत्तरः | बुधः | कुबेरः |
| ईशानः | गुरुः | ईशः |

## गृहविभागस्य सहेतुकं विश्लेषणम्

प्राचीनकाले भारतवर्षे अधिकतः संयुक्तपरिवारस्य परम्पराऽऽसीत् । अत एव तस्मिन् काले परिवारस्यावश्यकतानुगुणं भवने षोडशप्रकोष्ठानां निर्माणं विविधदिक्षु क्रियते स्म, यस्य सहेतुकं विश्लेषणमत्र प्रदीयते ।

## गृहविभागचक्रम्




## स्नानगृहम्

पूर्वदिशायाः स्वामी ग्रहः सूर्यः वर्तते । सूर्योदयकालीनसूर्यस्य शुद्ध-शक्तिवर्धकरश्मयः शरीरे निपतन्ति, यस्मात् त्वक् कान्तियुक्तो भवति । सूर्यः स्वप्रकाशेन अन्धकारस्य निवारणपूर्वकं रोग-दुःस्वप्नादीनां नाशं करोति ।[७] तस्मात् तस्य रश्मयः शुभफलप्रदाः । तत्रापि सूर्यसूक्ते वर्णनं प्राप्यते, यत् शुभाकांक्षिणः भक्तजनाः उषाकाले सूर्यमुपासते ।[८] इत्यस्मात् पूर्वस्यां दिशि एव स्नानगृहमुत्तमं फलप्रदं ज्ञायते ।

## पाकगृहम्

आग्नेयकोणे एव पाकगृहं वास्तुशास्त्रज्ञैः अभिमतम् । आग्नेयकोणस्याधिपतिः आग्निदेवः, यः ब्रह्माण्डे तेजसः

प्रत्यक्षस्वरूपो वर्तते, अग्नौ तेज-प्रकाश-दाहकत्वशक्तिः प्राचुर्येण निहिता,[९] - तस्मात् अग्निदेवस्याधिकारक्षेत्रमेव भोजनपाचयितुमुत्कृष्टस्थलम् । दिशाजन्यशुद्धिवशेन खाद्यपदार्थमपि शुद्धयति । शुद्धभोजनेन च गृहसदस्यानां सत्त्वशुद्धिः जायते, यथोक्तम् —

'आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवास्मृतिः ।[१०]

तस्मादाग्नेयकोणस्थपाकशालायां निर्मितगुणयुक्तभोज्यपदार्थादीनां भक्षणेन एव व्यक्तेः व्यक्तित्व-शौर्य-बल-बुद्धीत्यादीनां विकासः सम्भवति ।

## शयनगृहम्

गृहस्वामिनः कृते भवनस्य मुख्यशयनकक्षः दक्षिणदिशि भवेत् । दक्षिणदिशायाः स्वामीग्रहः भौमः । ज्योतिषशास्त्रानुसारेण भौमः सेनापतिः, बलयुक्तः, रक्तवर्णः, अग्नितत्त्वयुक्तश्च भवति।[११] तस्मात् दक्षिणादिशा दक्षता—चातुर्य-कौशल-शौर्य-वीर्यादिगुणानां प्रतिनिधित्वं करोति । मनुष्यः दाक्षिण्यजन्यव्यवहारेणैव स्वव्यक्तित्वं विकासयति, परिवारस्य च नेतृत्वं कर्तुं समर्थो भवति । तस्मादस्यां दिशि गृहस्वामिनः शयनकक्षः निर्दिष्टः । इतोऽपि यमः दक्षिणदिशायाः देवता वर्तते । यमः द्यौ-पृथिवी-आप-ओषधी-ऋक्-सुनृतादिषट्भूमीनां विराटसंसारस्य च संरक्षकः इति ऋग्वेदे उक्तः ।[१२] तथैव गृहस्वामी अपि स्वपरिवारं संरक्षति, अत एव यमस्य दक्षिणदिशि गृहस्वामिनः शयनकक्षः सर्वथैव युक्तिसङ्गत इति ।

## शस्त्रगृहम्

भवनस्य नैर्ऋत्यकोणः शस्त्रसंग्रहणार्थमथवा वर्तमानपरिप्रेक्ष्ये अधिकभारयुक्तवस्तूनां संग्रहणार्थं युज्यते । नैर्ऋत्यदिशाधिपतिः ग्रहः राहुः, देवता नैर्ऋतिश्च वर्तते । तस्यापरः नाम राक्षसः । फलदीपिकायां राहुग्रहस्याध्ययनेन तस्य मलिनस्वरूपः ज्ञायते ।[१३] राक्षसानामपि हिंसकप्रवृत्तयः मलिनस्वरूपश्च । शस्त्रादीनि हिंसककर्मसाधनानि च सन्ति, शस्त्राणामधिकभारयुक्तवस्तूनां वा प्रत्यहमप्रयोगत्वात् स्थलमिदं प्रायशः मलिनं भवति अत एव राहुग्रहस्य नैर्ऋतिदेवातायाश्च दिशि शस्त्रगृहं निर्मेयम् ।

## भोजनगृहम्

भोजनार्थं प्राचीनकाले गृहस्य पश्चिमदिशास्थितप्रकोष्ठः प्रयुज्यते स्म । आधुनिके काले तु भोजनं पाकशालायाः समीपस्थप्राङ्गणे उत्पीठिकायां क्रियते । किन्तु वास्तुशास्त्रान्तर्गतं पश्चिमदिशास्थितकक्ष एव भोजनार्थमुपयुक्तो भवति । यतोहि पश्चिमदिशाधिपतेः वरुणस्य मुखमग्नितुल्यमिति ऋषिभिः ऋग्वेदे अभिमतम् ।[१४] अग्निश्च भोजनस्य जीर्णे कारणम्, तस्मात् भोजनगृहं पश्चिमायां प्रशस्तम् । यद्यपि पश्चाद्वर्तिकाले वरुणस्य सम्बन्धः जलेन सह स्थापितः यस्मात् वरुणः नदी-समुद्रादीनां देवः सञ्जातः ।[१५] अयमेव कारणं यत् आधुनिकाः वास्तुविदाः पश्चिमदिशि अपि जलव्यवस्थां कल्पयन्ति ।

## धान्यसंग्रहगृहम्

भवनस्य वायव्यां दिशि धान्यसंग्रहगृहं कल्पयेत् । वायव्यदिशाधिपतिश्चन्द्रः तथा चाधिष्ठाता वायुदेवो वर्तते । पश्चिमदिशातः शुद्धजलवायुरुत्तरदिशाजन्योच्चतमविचाराणां संयोगः वायव्यकोणे दृश्यते । ज्योतिषमतानुसारेण चन्द्रः शीतरश्मियुक्तः[१६] अन्नस्य [१७] च कारको भवति । वायुदेवश्च साक्षात् वायुस्वरूपः, अनयोः गुणधर्मयोः संयोगः वायव्यदिश्येव, चिरकालं यावत् धान्यं संरक्षयितुं वायोः शीतलतायाश्चोपस्थितिः अत्यावश्यकी वर्तते । तस्मात् वायव्यां धान्यसंग्रहगृहनिर्माणं सहेतुकं दृश्यते ।

## कोषगृहम्

उत्तरदिशाधिपतिग्रहः बुधः देवता कुबेरश्च प्रोक्तः । उत्तरदिशा उच्चतरविचार-उन्नति-उच्चता-श्रेष्ठभावादीनां दिशा वर्तते । मत्स्यपुराणानुसारेण कुबेरः अष्टनिधियुक्तः, धनं व्ययीकर्तुमुद्यतकरयुक्तः, श्वेतवस्त्रधारी च वर्तते[१८] यथोक्तं मत्स्यपुराणे -

कुबेरं च प्रवक्ष्यामि कुण्डलाभ्यालङ्कृतम् ।
महोदरं महाकाय निध्यष्टकसमन्वितम् ।।
गुह्यकैर्बहुभिर्युक्तं धनव्ययकरैस्तथा ।
हारकेयूररचितं सिताम्बरधरं सदा ।।

अत एव धनसम्पदः स्वामिनः कुबेरस्योत्तरदिशायां कोषगृहनिर्माणं वैज्ञानिकं भवति ।

## देवगृहम्

भूखण्डस्यैशान्यां देवगृहं वास्तुविदैर्निर्दिश्यते । अत्रेशानकोणाधिपतिः ग्रहः बृहस्पतिः देवश्च ईशः (रुद्रः) कथितः । होराग्रन्थेषु बृहस्पतिः 'शुभग्रहः धर्मपरायणः'[१९] 'ब्राह्मणवर्णः सत्त्वगुणयुक्तश्चोक्तः'[२०] इतोऽपि ईशानकोणाधिपति देवः स्वयमेव ईशः (रुद्रः, ईश्वरः) तस्मात् ईश्वरोपासना ईशाधिष्ठितेशानकोणे एव साफल्यं

प्राप्स्यति । अत एव ईशबृहस्पतयोः ईशानकोणे देवगृहं सप्रमाणं सिद्धयति ।

### दधिमन्थनगृहम्

प्राचीनकाले पशुपालनं मनुष्याणां प्रमुखकार्यमासीत् । पूर्वस्यां जलव्यवस्थाकारणात्, आग्नेय्यां पाकगृहस्य सामीप्याच्च पूर्वाग्नेययोर्मध्ये दधिमन्थनगृहं निर्मीयते स्म ।

### घृतसङ्ग्रहगृहम्

घृतसङ्ग्रहगृहमाग्नेयदक्षिणयोर्मध्ये पाककार्ये घृतस्य प्रयोगत्वात् पाकगृहस्य समीपे एव निर्मीयते । ऋग्वेदे घृतमग्निदेवस्य नेत्रमुक्तं[२१] पाकशालायां च प्रयोगे सुविधावशात् आग्नेयदक्षिणयोर्मध्ये घृतसङ्ग्रहगृहस्य निर्माणं तर्कसङ्गतमेवेति । घृत्तं बलवर्धकं पुष्टिदायकं च भवति । दक्षिणदिशि शौर्यवीर्यसम्पन्नभौमग्रहस्य[२२] प्रभावादपि घृतसंग्रहगृहमत्रैव प्रशस्यते ।

### शौचालयः

दक्षिणनैर्ऋत्योर्मध्ये पुरीषत्यागस्य गृहं निर्मेयम् । वस्तुतः नैर्ऋत्यदिशाधिपतिः राहुग्रहः मलिनतायाः[२३] प्रतीको भवति, तथा च दक्षिणदिशायां गृहस्य वृद्धजनानां ज्येष्ठानां कृते वा शयनगृहं प्रोक्तम्, अत एव वृद्धानामसमर्थतावशात् राहुग्रहस्य मलिनप्रभाववशाच्चात्र शौचालयः दक्षिणनैर्ऋत्योर्मध्ये एवोत्तमो भवति ।

### विद्याभ्यासगृहम्

नैर्ऋतिपश्चिमयोर्मध्ये विद्याभ्यासगृहं शास्त्रसम्मतमस्ति। अस्यां दिशि अध्ययनादध्येता प्रखरबुद्धियुक्तः, महानचिन्तकः प्रतिभाशाली, विज्ञानी, कल्पनाशीलः, यशस्वी च भवति।

### शोकगृहम्

पश्चिमवायव्ययोर्मध्ये स्थितगृहे नृपतीनां काले दोषकर्तृभ्यः मनुष्येभ्यः दण्डविधानम्, न्यायविधानञ्च क्रियते स्म । अत्र पश्चिमदिशाधिपतिश्शनिः न्यायप्रियः, वायव्यदिशाधिपतिश्चन्द्रश्च गम्भीरविचारकुशलो वर्तते। तस्मात् कक्षेऽस्मिन् सामाजिक-अपराधिक-पारिवारिकसमस्यानां समाधानं शीघ्रं भवितुमर्हति। प्रकोष्ठोऽयं शुभकार्यार्थं न प्रयोक्तव्यम्।

### रतिगृहम्

नवदम्पतेः शयनार्थमुत्तरवायव्योर्मध्ये रतिगृहस्य निर्माणं कर्त्तव्यम्। प्रकोष्ठोऽयं दक्षिणदिशायां स्थितगृहपतेः प्रकोष्ठात् पर्याप्तन्तराले विद्यमानत्वात् शिष्टाचारं वर्धयति, नवदम्पत्तेः गोपनीयताञ्च रक्षति। वायव्यदिशाऽधिपतिग्रहः चन्द्रः चेतसः प्रसन्नतायाः, स्त्रीप्राप्तेः, सुन्दरतायाश्च कारको भवति।[२४] वायव्यदिशाऽधिष्ठातृदेवतावायुः। गीतायाः मनसः उपमा वायुना कृता[२५] यथा -

**चञ्चलं हि मनः कृष्णः प्रमाथि बलवद्दृढम्। तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥**

मनश्च रतिभिप्रेरकत्वात् उत्तरदिशाधिपतेः बुधस्य च विहारस्थलकारकत्वात्[२६] उत्तरवायव्ययोर्मध्ये रतिगृहनिर्माणं वास्तुशास्त्रस्य वैज्ञानिकदृष्टिकोणं द्योतयति।

### औषधगृहम्

उत्तरैशान्योर्मध्ये औषधगृहं कर्त्तव्यम्। यतोहि रुद्रसूक्तानुसारं ईशानकोणाधिपतिः ईशः रुद्रो वा "औषधीनां प्रदाता, रोगनाशकर्त्ता"[२७] चिकित्सकेषु च उत्तमचिकित्सको भवति।[२८] अत एव प्राणीनामुत्तमचिकित्सकस्य रुद्रस्य पार्श्वे एवोत्तरैशान्मध्ये औषधगृहं प्रशस्तम्।

### सर्वसंग्रहगृहम्

सर्वसंग्रहगृहे पारिवारिकस्तरे प्रयुक्तसर्वसामान्यवस्तूनां संग्रहः क्रियते। गृहमिदं पूर्वेशानयोर्मध्ये निर्मीयते। प्रकोष्ठोऽयमावश्यकतायां प्रसूतिकार्येऽपि प्रयोक्तुं शक्यते। अत्र कारणमिदमस्ति, यत् गृहमिदम् ईशानकोणाधिपतेः रुद्रतुल्यचिकित्सकस्य सान्निध्ये औषधगृहस्य सामीप्ये पूर्वदिशायाः तेजस्विना स्फूर्ति-उर्जादिगुणधर्मयुक्तवातावरणे च वर्तते।

वस्तुतः आचार्यैः मानवानां सुविधायाः सुरक्षायाश्च दृष्ट्याऽस्य शास्त्रस्य रचना कृता। यदि वास्तुशास्त्रे तत्र प्रतिपादितसिद्धान्तैः विविधनियमोपनियमैश्च गृहनिर्माणं क्रियते तर्हि गृहस्वामी तस्य परिवारश्च अवश्यमेव इहलौकिकं पारलौकिकञ्च सुखमाप्नोति इत्यत्र नास्ति संदेहः।

### सन्दर्भः


१. बृ. मा., पृ. – ३, श्लो. – १५०.....१५८

२. वा. रत्न., अ. – ९, पृष्ट. – १२४

३. वा. रत्न., अ. – ९, पृष्ट. – १२४

४. वा. रत्न., अ. – ९, पृष्ट. – १२४

५. वा. रत्न., अ. – ९, पृष्ट. – १२४

६. बृ. सं., अ. – ४५, श्लोक. – ३

७. ऋ. वे., १०/३७/०४

८. ऋ. वे., ०१/११५/०२

९. ऋ. वे., ०४/०२/१९

१०. छा. प., ०६/२६/०२

११. बृ. जा., अ. – श्लोः – १, ४,६

१२. ऋ. वे., १०/१४/१६

१३. फ. दी., अ. – २, श्लोः – ३३. ३५

१४. ऋ. वे., ०७/८८/०२

१५. अथ. वे., ०५/२५/०४

१६. बृ. जा., अ. – २, श्लो, - २

१७. फ. दी., अ. – २, श्लो. – २

१८. म. पु., अ. – २६१, श्लो. २०,२१

१९. सा. व., अ. – ४, श्लो. – २,९,२५

२०. जा. पा., अ. – २, श्लो. – २६

२१. ऋ. वे., ०३/२६/०७

२२. बृ. जा., अ. – २, श्लो. – १

२३. फ. दी., अ. – २, श्लो. - ३३

२४. फ. दी., अ. – २, श्लोक. – २

२५. श्रीमद्भ. गी., अ. – ६, श्लोक. - ३४

२६. फ. दी., अ. – २, श्लोक. – ४

२७. ऋ. वे., ०२/३३/०२

२८. ऋ. वे. ०२/३३/०४